[1]पृष्यम्, पर्ष्यम्, पिपर्षिष्यम्, परीपृष्यम् ;
ईषत्पर्षः-[2]दुष्पर्षः-सुपर्षः ; — —
पृष्यमाणः, पर्ष्यमाणः, पिपर्षिष्यमाणः, परीपृष्यमाणः ;
पर्षः, पर्षः, पिपर्षिषः, परीपृषः ;
पर्षितुम्, पर्षयितुम्, पिपर्षिषितुम्, परीपृषितुम् ;
पृष्टिः, पर्षणा, पिपर्षिषा, परीपृषा ;
पर्षणम्, पर्षणम्, पिपर्षिषणम्, परीपृषणम् ;
[3]पर्षित्वा-पृष्ट्वा, पर्षयित्वा, पिपर्षिषित्वा, परीपृषित्वा ;
प्रपृष्य, प्रपर्ष्य, प्रपिपर्षिष्य, प्रपरीपृष्य ;
[4]दण्डोपपर्षम्, दण्डेनोपपर्षम्, दण्डपर्षं वा गाः कालयति ।
पर्षम् २, पर्षित्वा २-पृष्ट्वा २, } पर्षम् २, पर्षयित्वा २, } पिपर्षिषम् २, पिपर्षिषित्वा २, } परीपृषम् २ ; परीपृषित्वा २; }
[5]पृषितम्, [6]पृषत्-पृषती, [7]पृषतम् ।

(1055) "पॄ पालनपूरणयोः" (III-जुहोत्यादिः-1086. सक.सेट्.पर.)
'पृणाति पूरणे, श्लौ तु पिपर्ति, णिचि पारयेत् ॥' (श्लो. 36) इति देवः ।

---

1. 'ऋदुपधात्—' (3-1-110) इति भावकर्मणोः क्यप् । ण्यदपवादः ।
2. खल्विधायके सूत्रे (3-3-126) 'दुस्' इति सान्तस्योपसर्गस्योपादानम्, रेफान्तस्य च, इति पक्षद्वयम् । तत्र सान्तस्यैवेति पक्षे षत्वमत्रेति ज्ञेयम् । रेफान्तस्यैवेति पक्षे तु 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधः' (वा. 1-4-60) इति उपसर्गत्वनिषेधात् षत्वाभावः ।
3. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः । इट्पक्षे, 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधाद् गुणः ।
4. 'हिंसार्थानां च समानकर्मकाणाम्' (3-4-48) इति णमुल् । 'तृतीयाप्रभृतीन्यन्यतरस्याम्' (2-2-21) इति समासविकल्पः ।
5. बाहुलकान्निष्ठायामिडागम इति केचित् । वस्तुतस्तु बाहुलकात् औणादिके इतच्-प्रत्यये रूपमेवमिति ज्ञेयम् ।
6. 'वर्तमाने पृषद्-' (द. उ. 6-5) इत्यादिना कतिप्रत्यये, तस्य शतृवद्भावेन शपि, पररूपे च रूपमेवम् । स्त्रियाम्, उगित्त्वेन, 'उगितश्च' (4-1-6) इति ङीपि पृषती इति रूपम् ।
7. 'पृषिरञ्जिभ्यां कित्' (द. उ. 6-15) इति अतच्प्रत्ययः । पृषतः = मृगः, बिन्दुश्च ।